# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –आचार्यप्रथमवर्षम् (सत्रम्-१) | प्रश्नपत्रम् – २ | गुणा: – ७० |
| विषय: – फलितज्यौतिषम् | (C C.- ४.१.१. New & Old ) | समय: –८.०० त: ११.०० |
| दिनाङ्क: – १०/१०/२०१९ | सन्दर्भग्रन्थ: – बृहत्संहिता | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु ।** ०५

(अ) न तत्सहस्रं करिणां वाजिनां च चतुर्गुणम् ।
करोति देशकालज्ञो यथैको दैवचिन्तक: ॥

(ब) आवन्तिका जनपदा: कावेरीनर्मदातटाश्रयिण: ।
दृप्ताश्च मनुजंपतय: पीड्यन्ते क्षितिसुते ग्रस्ते ॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्योपरि निबन्धं लिखतु ।** १०

(अ) श्रावणमासफलम् ।

(ब) कुम्भ एवं मीनराशिस्थितसूर्यचन्द्रग्रहणयो: फलम् ।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: कस्यचित् एकस्योपरि सान्वयं व्याख्यां करोतु ।** ०५

(अ) पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानाम् ।
आरोग्यवृष्टिधान्यार्घसम्पदो मित्रलाभश्च ॥

(ब) नम्रा: यत: शिखिशिखाभिसृता यतो वा ।
ऋक्षं च यत् स्पृशति तत्कथितांश्च देशान् ।
दिव्यप्रभावनिहतान् स यथा गरुत्मान् ।
भुंक्ते गतो नरपति: परभोगिभोगान् ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्योपरि निबन्धं लिखतु ।** १०

(अ) अगस्त्यचाराध्याय: ।

(ब) अर्घदानलक्षणम् ।

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु ।** ०५

(अ) पूर्वात्रयं सानलमग्रजानां राज्ञां तु पुष्येण सहोत्तराणि ।
सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानाम् ॥
आदित्यहस्ताभिजिदाश्विनानि वणिग्जनानां प्रवदन्तितानि ।
मूलत्रिनेत्रानिलवारुणानि भान्युग्रजाते: प्रभविष्णुताया: ॥

(ब) भेदे वृष्टिविनाशो भेद: सुहृदां महाकुलानां च ।
उल्लेखे शस्त्रभयं मन्त्रिविरोध: प्रियान्नत्वम् ॥
अंशुविरोधे युद्धानि भूभृतां शस्त्ररूक्क्षुदवमर्दा: ।
युद्धे चाप्यपसव्ये भवति युद्धानि भूपानाम् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) ग्रहयुद्धकारणम् ।

(ब) भौमस्य वर्षफलम् ।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां करोतु । ०५**

(अ) आग्नेय्यां दिशि चन्द्रमा यदि भवेत्तत्रोपसर्गो महान् ।
नैऋत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः ।
प्राजेशानिलदिक्स्थिते हिमकरे सस्यस्य मध्यश्चयो
याते स्थाणुदिशं गुणाः सुबहवः सस्यार्घवृष्ट्यादयः ॥

(ब) सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे
वायुर्वा चण्डवेगः सजलजलधरो वापि गर्जत्यजस्रम् ।
विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं
विज्ञेया प्रावृडेषा मृदितजनपदा सर्वसस्यैरुपेता ॥

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु । १०**

(अ) आषाढकृष्णचतुर्थीफलम् ।

(ब) रोहिण्याः पश्चिमस्थितचन्द्रफलम् ।

**संयुक्तान्वितिः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) ज्यौतिषशास्त्रे कति स्कन्धाः सन्ति ?

(२) बृहत्संहितायाः लेखकः कः ?

(३) यस्मिन् पद्धत्या ग्रहगतिनिर्णयं क्रियते तस्य नाम किम् ?

(४) यदि सूर्योत्तरायणमतिक्रम्य (मकरे प्रवृष्टं भूत्वा) उत्तरदिशि पुनरागच्छेत् तदा फलं किम् ?

(५) सूर्यः कस्मिन् राशौ कल्याणमेवं धान्यवृद्धिं करोति ?

(६) यदि केतुरुल्काताडितं भवति चेत् फलं किम् ?

(७) काश्मीरः भारतस्य कस्मिन् कोणे वर्तते ?

(८) ज्यौतिषे कृत्तिकागतपदार्थः वर्तते न वा ?

(९) महामात्राशब्दस्य कोऽर्थः ?

(१०) अशुचिशब्दस्य अर्थः कः ?

(११) अग्निकोणस्य वायुः प्रवहति तदा फलं किम् ?

(१२) दक्षिणदिशायाः वायुः प्रवहति चेत् फलं किम् ?

(१३) यदि आषाढमासे पूर्णिमायां सूर्यास्तकाले ईशानकोणस्य वायुः प्रवहति चेत् फलं किम् ?

(१४) सुमेरुपर्वतः कस्यां दिशिवर्तते ?

(१५) एकाढकस्यमानं पञ्चाशतपलं भवति न वा ?

----oooo----